1. "रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते" – इति कथनम् अस्ति –

(1) मम्मटस्य (2) विश्वनाथस्य
(3) भरतस्य (4) अभिनवगुप्तस्य
(5) अनुत्तरित प्रश्न

2. "संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च" इति केनोक्तम् ?

(1) आनन्दवर्धनेन (2) भामहेन
(3) कुन्तकेन (4) विश्वनाथेन
(5) अनुत्तरित प्रश्न

3. अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्यो कार्तार्थ्यं लभतेकदा ।।
श्लोकेऽस्मिन् रसदोषः अस्ति –

(1) च्युतसंस्कृति (2) श्रुतिकटु
(3) अप्रयुक्तम् (4) निरर्थकम्
(5) अनुत्तरित प्रश्न

4. रूपकस्य दशभेदेषु परिगणितं नास्ति –

(1) प्रकरणम् (2) भाणः
(3) त्रोटकम् (4) प्रहसनम्
(5) अनुत्तरित प्रश्न

5. "निज दोषावृत मनसामति सुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ।।"
अत्र समर्थनमस्ति –

(1) साधर्म्येण सामान्यकथनस्य विशेषकथनेन ।
(2) साधर्म्येण विशेषकथनस्य सामान्यकथनेन ।
(3) वैधर्म्येण सामान्यकथनस्य विशेषकथनेन ।
(4) वैधर्म्येण विशेषकथनस्य सामान्यकथनेन ।
(5) अनुत्तरित प्रश्न

6. "नन्वीषदर्थे नञः प्रयोग इति चेत्तर्हि 'ईषद् दोषौशब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात्" – इत्युक्तवता विश्वनाथेन कस्यं काव्यलक्षणस्य खण्डनं कृतम् ?

(1) कुन्तकस्य (2) आनन्दवर्धनस्य
(3) महिमभट्टस्य (4) मम्मटस्य
(5) अनुत्तरित प्रश्न

7. योग्यताकांक्षासत्तियुक्तः पदोच्चयः कथ्यते –

(1) काव्यम् (2) वाक्यम्
(3) पदम् (4) वाच्यम्
(5) अनुत्तरित प्रश्न

8. अर्पिता शक्तिः अस्ति –

(1) तात्पर्या (2) अभिधा
(3) लक्षणा (4) व्यञ्जना
(5) अनुत्तरित प्रश्न

9. 'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः' इति कः भवति ?

(1) गुणः (2) रसः
(3) अलंकारः (4) ध्वनिः
(5) अनुत्तरित प्रश्न

10. "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्त गुणान्वितः...."
इत्यादि महाकाव्यलक्षणमभिहितमस्ति –

(1) धनञ्जयेन (2) विश्वनाथेन
(3) अभिनवगुप्तेन (4) भरतेन
(5) अनुत्तरित प्रश्न

11. स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ।।
श्लोकेऽस्मिन् अलंकारः वर्तते –

(1) श्लेष (2) उत्प्रेक्षा
(3) रूपक (4) उपमा
(5) अनुत्तरित प्रश्न

12. अधोलिखितेषु अनुचितकथनम् अस्ति :
(1) नाटकं ख्यातवृत्तं स्यात् ।
(2) नाटकं चतुस्सन्धि समन्वितं स्यात् ।
(3) सर्गबन्धो महाकाव्यम् ।
(4) रूपकाणि दश ।
(5) अनुत्तरित प्रश्न

13. "काव्यस्यात्मा ________ इति बुधैः यः समाम्नात् पूर्वः" रिक्तस्थानं पूरयत ।
(1) रीतिः (2) ध्वनिः
(3) रसः (4) अलंकारः
(5) अनुत्तरित प्रश्न

14. "स्वेच्छा केसरिणः स्वच्छस्वच्छाया......न खाः" इति केन सम्बद्धः ?
(1) ध्वन्यालोकेन (2) साहित्यदर्पणेन
(3) काव्यप्रकाशेन (4) काव्यादर्शेन
(5) अनुत्तरित प्रश्न

15. "अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया" इत्यत्र 'तया' पदेन ध्वनेः लक्षणं कया न लक्ष्यते ?
(1) उक्त्या (2) तात्पर्यवृत्त्या
(3) भक्त्या (4) अभिधया
(5) अनुत्तरित प्रश्न

16. 'उपसर्जनीकृतस्वार्थौ' इत्यस्य अर्थः अस्ति -
(1) गौणीकृतस्वार्थौ (2) प्रकटीकृतस्वार्थौ
(3) प्रतीतिकृतस्वार्थौ (4) व्यक्तीकृतस्वार्थौ
(5) अनुत्तरित प्रश्न

17. साहित्यदर्पणे 'अष्टौ रसाः' इत्युक्त्वा कविना एकः कोऽतिरिक्तः रसः स्मृतः ?
(1) उन्मादः (2) शान्तः
(3) आनन्दः (4) उद्वेगः
(5) अनुत्तरित प्रश्न

18. 'मरणान्तानि वैराणि' इति कथनम् अस्ति -
(1) रामस्य (2) युधिष्ठिरस्य
(3) भीमस्य (4) अर्जुनस्य
(5) अनुत्तरित प्रश्न

19. समुचितं क्रमं चिनुत –
(क) अरण्यकाण्डम्
(ख) किष्किन्धाकाण्डम्
(ग) अयोध्याकाण्डम्
(घ) बालकाण्डम्
(1) (क), (ख), (ग), (घ)
(2) (घ), (क), (ख), (ग)
(3) (घ), (ग), (क), (ख)
(4) (क), (ग), (घ), (ख)
(5) अनुत्तरित प्रश्न

20. अत्र कानिचन संस्कृतनाटकानि उल्लिखितानि –
(क) प्रतिमानाटकम्
(ख) अभिषेकनाटकम्
(ग) महावीरचरितम्
(घ) उत्तररामचरितम्
रामायणाधारितानां क्रमसंख्याः सन्ति –
(1) केवलं (क), (घ)
(2) केवलं (ग), (घ)
(3) केवलं (क), (ख), (घ)
(4) चत्वारि एव
(5) अनुत्तरित प्रश्न

21. महाभारतस्य प्रथमं नाम किम् आसीत् ?
(1) विजयः (2) जयः
(3) बालभारतम् (4) लघुभारतम्
(5) अनुत्तरित प्रश्न

22. थः साहसं कारयति सः कति गुणं दमं दाप्यः ?
(1) पञ्चगुणम् (2) त्रिगुणम्
(3) द्विगुणम् (4) चतुर्गुणम्
(5) अनुत्तरित प्रश्न

23. 'रामोपाख्यानम्' महाभारतस्य कस्मिन् पर्वणि अस्ति ?

(1) आदिपर्वणि (2) उद्योगपर्वणि
(3) वनपर्वणि (4) सभापर्वणि
(5) अनुत्तरित प्रश्न

24. "प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।" उक्तिरियं कस्माद् ग्रन्थाद् गृहीता ?

(1) मनुस्मृतेः
(2) याज्ञवल्क्यस्मृतेः
(3) अर्थशास्त्रात्
(4) महाभारतात्
(5) अनुत्तरित प्रश्न

25. महाभारतस्य उपजीवी नास्ति –

(1) सौन्दरनन्दम् (2) किरातार्जुनीयम्
(3) नैषधीयचरितम् (4) मध्यमव्यायोगः
(5) अनुत्तरित प्रश्न

26. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायानुसारेण "औरसः" पुत्रः भवति –

(1) गूढजः (2) पुत्रिकासुतः
(3) धर्मपत्नीजः (4) कानीनः
(5) अनुत्तरित प्रश्न

27. अधोलिखितवाक्येषु असत्यम् अस्ति :

(1) वाल्मीकीय रामायणे प्रक्षिप्तांशाः अपि सन्ति ।
(2) वाल्मीकीय रामायणस्य टीकाः अपि सन्ति ।
(3) रामकथा विदेशेषु प्रचलिता नास्ति ।
(4) जैनमते अपि रामायणाधारितः रामकथाग्रन्थः वर्तते ।
(5) अनुत्तरित प्रश्न

28. "सहाध्यायिनोऽमात्यान्कुर्वीत" इति मतमस्ति

(1) विशालाक्षस्य । (2) भारद्वाजस्य ।
(3) कौणपदन्तस्य । (4) वातव्याधेः ।
(5) अनुत्तरित प्रश्न

29. श्रीमद्भागवतपुराणस्य कस्मिन् स्कन्धे श्रीकृष्णस्य गोवर्धनोद्धरण लीला वर्णिता –

(1) अष्टम् (2) नवम
(3) दशम (4) द्वादश
(5) अनुत्तरित प्रश्न

30. सामान्यतया विष्णु सम्बद्धानि षट्पुराणानि स्वीक्रियन्ते –

(1) सात्त्विक पुराणानि (2) राजस पुराणानि
(3) तामस पुराणानि (4) संकीर्ण पुराणानि
(5) अनुत्तरित प्रश्न

31. पुराणलक्षणेषु प्रतिसर्गस्य अर्थः अस्ति –

(1) सृष्टिः
(2) प्रलयः
(3) राजवंशवर्णनम्
(4) अवान्तरराज्ञां वर्णनम्
(5) अनुत्तरित प्रश्न

32. "ॐ नमः शुक्रबृहस्पतिभ्याम्" इति मङ्गलाचरणं कस्य शास्त्रस्य अस्ति ?

(1) धर्मशास्त्रस्य (2) कामशास्त्रस्य
(3) अर्थशास्त्रस्य (4) मोक्षशास्त्रस्य
(5) अनुत्तरित प्रश्न

33. अधोलिखितेषु उपपुराणम् अस्ति –

(1) कल्कि पुराणम् (2) अग्नि पुराणम्
(3) मत्स्य पुराणम् (4) मार्कण्डेय पुराणम्
(5) अनुत्तरित प्रश्न

34. कौटिल्यानुसारेण इयं विद्या नास्ति –
(1) आन्वीक्षकी (2) त्रयी
(3) दण्डनीतिः (4) समाजनीतिः
(5) अनुत्तरित प्रश्न

35. "आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्योर् _____ विदुर्बुधाः ।।"
रिक्तस्थानं पूरयत –
(1) ब्रह्मावर्तं (2) आर्यावर्तं
(3) म्लेच्छदेशः (4) मध्यदेशः
(5) अनुत्तरित प्रश्न

36. कौटिल्यानुसारं त्रयी कथ्यते –
(1) सामवेदः, ऋग्वेदः, यजुर्वेदः
(2) सामवेदः, ऋग्वेदः, अथर्ववेदः
(3) सामवेदः, यजुर्वेदः, अथर्ववेदः
(4) ऋग्वेदः, यजुर्वेदः, अथर्ववेदः
(5) अनुत्तरित प्रश्न

37. "त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति" इति कस्याभिप्रायः ?
(1) कौटिल्यस्य (2) भारद्वाजस्य
(3) शुक्राचार्यस्य (4) याज्ञवल्क्यस्य
(5) अनुत्तरित प्रश्न

38. "सोऽभिध्याय....... अप एव ससर्जादौ" अत्र सः इत्यस्य अर्थः अस्ति –
(1) स्वयंभूः भगवान् (2) स्वयं ब्रह्मा
(3) विराट् पुरुषः (4) प्रजापतिः
(5) अनुत्तरित प्रश्न

39. कौटिल्यानुसारं विद्याविनयहेतुरस्ति –
(1) इन्द्रियजयः (2) दण्डः
(3) वार्ता (4) लोकयात्रा
(5) अनुत्तरित प्रश्न

40. आचारः परमो धर्मः – कीदृशः आचारः ?
(1) वृद्धजनोक्तः (2) श्रुतिस्मृत्युक्तः
(3) ब्राह्मणोक्तः (4) धर्मशास्त्रोक्तः
(5) अनुत्तरित प्रश्न

41. भारतवर्षस्य प्राचीनतमा ध्वनिलिपिः मन्यते –
(1) खरोष्ठीलिपिः (2) ब्राह्मीलिपिः
(3) देवनागरीलिपिः (4) शारदालिपिः
(5) अनुत्तरित प्रश्न

42. असत्यकथनम् अस्ति –
(1) नोच्छिष्टं कस्यचिद् दद्यात् ।
(2) न अद्यात् चैव उच्छिष्टम् ।
(3) अत्यशनं च कुर्यात् ।
(4) उच्छिष्टः क्वचित् न व्रजेत् ।
(5) अनुत्तरित प्रश्न

43. "श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः ।
राज्ञा _____ कार्या रिपौ मित्रे च ये समाः ।।"
रिक्तस्थानाय उचितं पदमस्ति –
(1) भ्रातरः (2) ब्राह्मणाः
(3) सभासदः (4) कर्मकाराः
(5) अनुत्तरित प्रश्न

44. अक्षः, परिवादः, मदः इत्यादीनि व्यसनानि सन्ति
(1) कामजनितानि (2) क्रोधजनितानि
(3) धनजनितानि (4) बलजनितानि
(5) अनुत्तरित प्रश्न

45. मनुस्मृतेः सप्तमाध्याये 'श्यामो', 'लोहिताक्षो', 'पापहा' इति विशेषणपदानि कस्य सन्ति ?
(1) नृपस्य (2) दण्डस्य
(3) दानवस्य (4) नरस्य
(5) अनुत्तरित प्रश्न

46. यस्य राज्ञः राष्ट्रात् दस्युभिः प्रजाः ह्रियन्ते सः राजा भवति –

(1) तीक्ष्णः (2) मृदुः

(3) कोशहीनः (4) मृतः

(5) अनुत्तरित प्रश्न

47. महाभारतस्य उपजीव्येषु नाटकेषु एतन्नास्ति –

(1) वेणीसंहारम् (2) पञ्चरात्रम्

(3) बालभारतम् (4) स्वप्नवासवदत्तम्

(5) अनुत्तरित प्रश्न

48. साहसलक्षणम् अस्ति –

(1) पितापुत्र विरोधे साक्ष्यम् ।

(2) सामान्यद्रव्यस्य बलात् अपहरणम् ।

(3) गुडादिषु हीनद्रव्य प्रक्षेपणम् ।

(4) स्वच्छन्द विधवा गमनम् ।

(5) अनुत्तरित प्रश्न

49. ब्राह्मीलिपेरुत्पत्तिः सेमेटिकलिपितः को मन्यते ?

(1) पादरी जेम्सस्टिवेन्सन्महोदयः

(2) सर्विलिअमजोन्समहोदयः

(3) ब्यूहलरमहोदयः

(4) जेम्सप्रिन्सेपमहोदयः

(5) अनुत्तरित प्रश्न

50. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते ?

(1) भीष्मपर्वणि (2) वनपर्वणि

(3) शान्तिपर्वणि (4) मौसलपर्वणि

(5) अनुत्तरित प्रश्न

51. अधोलिखितेषु स्थलेषु कस्मिन् अशोकस्याभिलेखः न उपलभ्यते ?

(1) गिरिनारे

(2) मेहरौली स्थले

(3) शहबाजगढ़ी स्थले

(4) मानसेहरा स्थले

(5) अनुत्तरित प्रश्न

52. "निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरिष्विव जायते ।।"
इति पद्ये कः, कस्मिन्ग्रन्थे कालिदासीयां कवितां प्रशंसति ?

(1) श्रीहर्षः, नैषधीयचरिते

(2) माघः, शिशुपालवधे

(3) बाणभट्टः, हर्षचरिते

(4) भवभूतिः, उत्तररामचरिते

(5) अनुत्तरित प्रश्न

53. अत्र संस्कृत काव्यानाम् एका सूचिः वर्तते –

(क) रघुवंशम्

(ख) शिशुपालवधम्

(ग) किरातार्जुनीयम्

(घ) नैषधीयचरितम्

रचनाकाल दृष्ट्या प्राचीनतः अर्वाचीनं प्रतिक्रमः अस्ति –

(1) (क), (ख), (ग), (घ)

(2) (क), (ग), (ख), (घ)

(3) (क), (घ), (ख), (ग)

(4) (क), (ग), (घ), (ख)

(5) अनुत्तरित प्रश्न

54. अशोकस्य "शहबाजगढ़ी" स्थले उपलब्धोऽभिलेखः कस्यां लिप्यां निबद्धः ?

(1) खरोष्ठी – लिप्याम्

(2) ब्राह्मी – लिप्याम्

(3) अरेमाइक – लिप्याम्

(4) यूनानी – लिप्याम्

(5) अनुत्तरित प्रश्न

55. किरातार्जुनीयमहाकाव्ये मुख्यः रसः अस्ति –
(1) शृङ्गारः (2) शान्तः
(3) वीरः (4) रौद्रः
(5) अनुत्तरित प्रश्न

56. 'घण्टामाघ' इत्युपाधिना विभूषितः कः ?
(1) कालिदासः (2) भारविः
(3) कुमारदासः (4) माघः
(5) अनुत्तरित प्रश्न

57. 'नैषधीयचरितम्' महाकाव्यस्य नायिका दमयन्त्याः अपरं नाम किम् ?
(1) भैमी (2) जानकी
(3) द्रौपदी (4) कुन्ती
(5) अनुत्तरित प्रश्न

58. बृहत्त्रय्यां नास्ति –
(1) किरातार्जुनीयम् (2) शिशुपालवधम्
(3) रघुवंशम् (4) नैषधीयचरितम्
(5) अनुत्तरित प्रश्न

59. "कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ।" उक्तिरियं निगदिता वर्तते
(1) वनेचरेण (2) द्रौपद्या
(3) अर्जुनेन (4) भीमेन
(5) अनुत्तरित प्रश्न

60. अश्वघोषः कस्य समकालिकः आसीत् ?
(1) कनिष्कस्य (2) समुद्रगुप्तस्य
(3) अशोकस्य (4) हर्षवर्द्धनस्य
(5) अनुत्तरित प्रश्न

61. गम्भीरानद्याः उल्लेखः कुत्र अस्ति ?
(1) मेघदूते (2) बुद्धचरिते
(3) शिशुपालवधे (4) नैषधीयचरिते
(5) अनुत्तरित प्रश्न

62. "हितं मनोहारि च दुर्लभं वचः" इत्युक्तिः युधिष्ठिरं को उक्तवान् ?
(1) वनेचरः (2) अर्जुनः
(3) भीमः (4) नकुलः
(5) अनुत्तरित प्रश्न

63. 'दशकुमारचरितम्' गद्यकाव्ये राजहंसस्य राजधानी आसीत् –
(1) विदिशा (2) पुष्पपुरी
(3) अवन्ती (4) विदर्भः
(5) अनुत्तरित प्रश्न

64. मृच्छकटिकस्य नायकः अस्ति –
(1) चारुदत्तः (2) शर्विलकः
(3) रोहसेनः (4) शकारः
(5) अनुत्तरित प्रश्न

65. "श्रेयसि केन तृप्यते" इत्युक्तिः शिशुपालवधे केन निगदिता ?
(1) श्रीकृष्णेन (2) जरासन्धेन
(3) नारदेन (4) शिशुपालेन
(5) अनुत्तरित प्रश्न

66. राजाहर्षवर्धनस्य पिता कः आसीत् ?
(1) प्रभाकरवर्धनः (2) राजवाहनः
(3) सिंहनादः (4) सोमदेवः
(5) अनुत्तरित प्रश्न

67. ऐतिहासिकगद्यकाव्यम् अपि अस्ति –
(1) हर्षचरितम् (2) कादम्बरी
(3) दशकुमारचरितम् (4) विश्रुतचरितम्
(5) अनुत्तरित प्रश्न

68. शूद्रकस्य राजसभायां आगता चाण्डालकन्या कस्य देशस्य राजकुमारी आसीत् ?
(1) मातङ्गदेशस्य (2) कलिङ्गदेशस्य
(3) वङ्गदेशस्य (4) अङ्गदेशस्य
(5) अनुत्तरित प्रश्न

69. राजाशूद्रकस्य प्रशंसायां कः आर्याछन्दोबद्धं श्लोकं पठति ?
(1) चाण्डालकन्या (2) प्रतिहारी
(3) अमात्यः (4) वैशम्पायनशुकः
(5) अनुत्तरित प्रश्न

70. पुराविदः काम् 'अपर्णा' इति वदन्ति ?
(1) सीताम् (2) पार्वतीम्
(3) मेनाम् (4) वासवदत्ताम्
(5) अनुत्तरित प्रश्न

71. "द्विषन्ति मन्दाश्चरितं महात्मनाम्" इति वचनमस्ति
(1) मेनायाः हिमवन्तं प्रति
(2) ब्रह्मचारिणः पार्वतीं प्रति
(3) पार्वत्याः ब्रह्मचारिणं प्रति
(4) पार्वतीवयस्यायाः पार्वतीं प्रति
(5) अनुत्तरित प्रश्न

72. शकुन्तलायाः पुत्रस्य नाम अस्ति –
(1) शार्ङ्गरवः (2) सर्वदमनः
(3) शारद्वतः (4) माढव्यः
(5) अनुत्तरित प्रश्न

73. मुद्राराक्षसनाटकस्य वैशिष्ट्यं नास्ति –
(1) नायिकायाः अभावः
(2) ऐतिहासिक कथानकम्
(3) विदूषकस्य अभावः
(4) शृङ्गारस्य प्रधानता
(5) अनुत्तरित प्रश्न

74. "वच्छे ! भत्तुणो बहुमदा होहि"
["वत्से ! भर्तुर्बहुमता भव"] इत्युक्तवती –
(1) तृतीया तापसी (2) अनसूया
(3) प्रियंवदा (4) गौतमी
(5) अनुत्तरित प्रश्न

75. 'मृच्छकटिकम्' रूपकस्य कीदृशः भेदोऽस्ति ?
(1) नाटकम् (2) व्यायोगः
(3) ईहामृगः (4) प्रकरणम्
(5) अनुत्तरित प्रश्न

76. "क्वचित् पथा सञ्चरते सुराणाम्
क्वचित् घनानां पततां क्वचिच्च ।" इत्यत्र रामस्य इच्छानुसारं किं स्वयमेव प्रयाति ?
(1) मृगकुलम् (2) स्यन्दनम्
(3) नभोमरुत् (4) पुष्पकविमानम्
(5) अनुत्तरित प्रश्न

77. 'शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्' इति शकुन्तलां प्रति वदति –
(1) प्रियंवदा (2) अनसूया
(3) काश्यपः (4) गौतमी
(5) अनुत्तरित प्रश्न

78. 'कृतककोपवृत्तान्तः' कस्मिन् नाटकेऽस्ति ?
(1) मुद्राराक्षसनाटके
(2) वेणीसंहारनाटके
(3) उत्तररामचरितनाटके
(4) स्वप्नवासवदत्तनाटके
(5) अनुत्तरित प्रश्न

79. अभिज्ञानशाकुन्तले नाटके प्रस्तावनायाः अन्तिमं श्लोकं को वदति ?
(1) दुष्यन्तः (2) सूत्रधारः
(3) नटी (4) पारिपार्श्विकः
(5) अनुत्तरित प्रश्न

80. कुमारसम्भवे का व्रताय मौञ्जीं बभार ?
(1) शकुन्तला (2) अनसूया
(3) गौरी (4) सुदक्षिणा
(5) अनुत्तरित प्रश्न

81. "पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः" अत्र वर्णनम् अस्ति -
(1) समुद्रस्य (2) गोदावरी तटस्य
(3) मन्दाकिनी तटस्य (4) प्रयागसङ्गमस्य
(5) अनुत्तरित प्रश्न

82. वेणीसंहारनाटकस्य मुख्यरसः अस्ति -
(1) वीररसः (2) शृङ्गाररसः
(3) अद्भुतरसः (4) रौद्ररसः
(5) अनुत्तरित प्रश्न

83. नल चम्पू काव्ये 'श्रीधरः' कस्य पितामहः आसीत् ?
(1) नलस्य (2) देवादित्यस्य
(3) श्रुतशीलस्य (4) त्रिविक्रमस्य
(5) अनुत्तरित प्रश्न

84. 'विवेश कश्चिज्जटिलस्तपोवनम्' – जटिलस्य वैशिष्ट्यं नास्ति -
(1) अजिनाषाढ घरः
(2) ज्वलन्निव ब्रह्ममयेन तेजसा
(3) शरीरबद्धः प्रथमाश्रमो यथा
(4) तपस्विनामप्युपदेशतां गतः
(5) अनुत्तरित प्रश्न

85. 'उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत्' अत्र कल्याणी अस्ति -
(1) कामधेनुः (2) सुदक्षिणा
(3) नन्दिनी (4) सुरभिः
(5) अनुत्तरित प्रश्न

86. 'स्वप्नवासवदत्तम्' इति नाटकस्य नायकः अस्ति -
(1) यौगन्धरायणः (2) उदयनः
(3) आरुणिः (4) चारुदत्तः
(5) अनुत्तरित प्रश्न

87. 'मनोगतं सान शशाक शंसितुम्' अत्र 'सा' इत्यस्य अर्थः अस्ति -
(1) पार्वती (2) मेना
(3) पार्वत्याः सखी (4) सीता
(5) अनुत्तरित प्रश्न

88. 'अनुस्मृताखण्डल सुनुविक्रमः' अत्र 'आखण्डलसूनुः' इत्यस्य अर्थः अस्ति -
(1) युधिष्ठिरः (2) नकुलः
(3) अर्जुनः (4) सहदेवः
(5) अनुत्तरित प्रश्न

89. 'किरातार्जुनीयम्' इति महाकाव्यस्य मङ्गलाचरणे प्रयुक्तं छन्दः अस्ति ।
(1) वंशस्थः (2) मालिनी
(3) वसन्ततिलका (4) इन्द्रवज्रा
(5) अनुत्तरित प्रश्न

90. 'धृतिमतीं भरतो ववन्दे' अस्मिन् श्लोकांशे धृतिमती का ?
(1) कैकयी (2) सीता
(3) सुमित्रा (4) कौशल्या
(5) अनुत्तरित प्रश्न

91. अनुचित युग्मम् अस्ति -
(1) स्वप्नवासवदत्तम् – भासः
(2) मृच्छकटिकम् – शूद्रकः
(3) वेणीसंहारम् – भवभूतिः
(4) मुद्राराक्षसम् – विशाखदत्तः
(5) अनुत्तरित प्रश्न

92. शिशुपालवधमहाकाव्यस्य कस्मिन् सर्गे नारदश्रीकृष्णयोः सम्वादः प्राप्यते ?

(1) तृतीयसर्गे (2) पंचमसर्गे
(3) षष्ठसर्गे (4) प्रथमसर्गे
(5) अनुत्तरित प्रश्न

93. ......... अधुनाऽपि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा" अत्र 'तेन' पदस्य अर्थः अस्ति –

(1) शिशुपालेन (2) रावणेन
(3) हिरण्यकश्यपेन (4) कंसेन
(5) अनुत्तरित प्रश्न

94. बाणभट्टस्य वंशः मन्यते

(1) रघुवंशः (2) वात्स्यायनवंशः
(3) गुप्तवंशः (4) नंदवंशः
(5) अनुत्तरित प्रश्न

95. कादम्बर्यां वर्णनक्रमः अस्ति –

(क) शबरमृगयावर्णनम्
(ख) विन्ध्यारवीवर्णनम्
(ग) अगस्त्याश्रमवर्णनम्
(घ) चाण्डालकन्यावर्णनम्

अत्र उचित क्रमः अस्ति -

(1) (घ), (ख), (ग), (क)
(2) (क), (ख), (ग), (घ)
(3) (घ), (ग), (ख), (क)
(4) (ख), (ग), (घ), (क)
(5) अनुत्तरित प्रश्न

96. "एको रसः करुण एव" इति सिद्धान्तस्य प्रतिनिधिकाव्यं विद्यते –

(1) वेणीसंहारम् (2) उत्तररामचरितम्
(3) हर्षचरितम् (4) नैषधीयचरितम्
(5) अनुत्तरित प्रश्न

97. 'व्योमवादः' पुस्तकस्य लेखकः कः ?

(1) कलानाथ शास्त्री
(2) पण्डितमधुसूदन ओझा
(3) पण्डितगिरिधरशर्मा चतुर्वेदी
(4) भट्टमथुरानाथ शास्त्री
(5) अनुत्तरित प्रश्न

98. 'मञ्जुनाथः' इति अपरनामा अस्ति –

(1) पं. विद्याधर शास्त्री
(2) पं. नित्यानन्द शास्त्री
(3) पं. रामप्रताप शास्त्री
(4) भट्टमथुरानाथ शास्त्री
(5) अनुत्तरित प्रश्न

99. प्राकृतभाषायां निबद्धस्य 'गाथासप्तशती' इति ग्रन्थस्य संस्कृतपद्यानुवादं केन कृतम् ?

(1) भट्टमथुरानाथशास्त्री कविना
(2) पंडित नवलकिशोरकांकर कविना
(3) पंडित जगदीशचन्द्राचार्य कविना
(4) ब्रह्मानन्दशर्मा कविना
(5) अनुत्तरित प्रश्न

100. "पितुरूपदेशः" कथायाः प्रणेता कविः

(1) श्रीरामदवे
(2) भट्ट मथुरानाथ शास्त्री
(3) पं. रामप्रताप शास्त्री
(4) गिरिधर शर्मा चतुर्वेदी
(5) अनुत्तरित प्रश्न

101. कादम्बरीकथामुखानुसारेण 'उत्पातकेतुरहित–जनस्य' विशेषणोऽस्ति

(1) तारापीडस्य (2) बाणभट्टस्य
(3) वैशम्पायनस्य (4) शूद्रकस्य
(5) अनुत्तरित प्रश्न

102. 'भारतवर्षीयार्योपाख्यानम्' इत्यस्य रचनाकारः अस्ति –

(1) पं. नवलकिशोर काङ्करः
(2) भट्ट मथुरानाथ शास्त्री
(3) पं. दुर्गाप्रसाद द्विवेदी
(4) पं. मधुसूदन ओझा
(5) अनुत्तरित प्रश्न

103. पं. नित्यानन्दशास्त्रिरचिते पुण्यश्रीचरितमहाकाव्ये कस्य जीवनचरितं लिखितम् ?

(1) जैन साध्व्याः
(2) जोधपुरनरेशस्य
(3) एकस्य राजकुमारस्य
(4) जोधपुरनरेशस्य पट्टमहिष्याः
(5) अनुत्तरित प्रश्न

104. अलङ्कारशास्त्रे नवीन मौलिक सिद्धान्तानां स्थापनां कृत्वा 'काव्य सत्यालोकः' इति ग्रन्थस्य रचनां कृतवान् –

(1) पं. जगदीशचन्द्राचार्यः
(2) पं. विश्वेश्वरनाथ रेऊ
(3) ब्रह्मानन्द शर्मा
(4) पं. गिरिधरव्यासः
(5) अनुत्तरित प्रश्न

105. पंडित नवलकिशोरकांकरमहोदयस्य कृतिः 'यात्राविलासः' अस्ति –

(1) नाटकम्
(2) प्रौढ़ उपन्यासः
(3) आख्यायिका
(4) महाकाव्यम्
(5) अनुत्तरित प्रश्न

106. यच्छन्त्यभीष्टं शुभदर्शनेन, निवेशयन्ती सुकृतेषु चेतः ।
रतेशमङ्कोल्लसिता सतीव तं सेवते भुक्तिनगर्ययोध्या ।।
पद्यमिदं केन महाकाव्येन सम्बद्धमस्ति –

(1) गोविन्दगीतिः
(2) सरस्वती-संदेशः
(3) गोविन्द-गौरवम्
(4) रामचरिताब्धि चरितम् ।
(5) अनुत्तरित प्रश्न

107. पं. विद्याधरशास्त्रिरचिते 'पूर्णानन्दम्' इत्यस्मिन् नाटके कथा अस्ति –

(1) पौराणिकी कथा ।
(2) भक्तपूर्णमलस्य लोककथा ।
(3) ऐतिहासिक कथा ।
(4) एकस्य वीर सैनिकस्य कथा
(5) अनुत्तरित प्रश्न

108. पं. दुर्गाप्रसाद द्विवेदिनः रचना नास्ति –

(1) दशकण्ठवधम् (2) दुर्गापुष्पाञ्जलिः
(3) देवराजचरितम् (4) वाणीलहरी
(5) अनुत्तरित प्रश्न

109. बीकानेरनरेशस्य अनूपसिंहस्य राजकविः आसीत् ?

(1) पंडितगिरिधरव्यासशास्त्री
(2) पंडितहरिद्विजः
(3) पंडितनवलकिशोर कांकरः
(4) पंडितहरिशास्त्री दाधीचः
(5) अनुत्तरित प्रश्न

110. सर्वप्रथमं राष्ट्रपति सम्मानित विद्वत्सु अन्यतमः आसीत् –

(1) पं. मधुसूदन ओझा

(2) पं. दुर्गाप्रसाद द्विवेदी

(3) पं. गिरिधर शर्मा चतुर्वेदी

(4) पं. श्रीराम दवे

(5) अनुत्तरित प्रश्न

111. "ध्रियते येन लोकोऽयमिति धर्मः स कीर्तितः ।
असौ सनातनो धर्मः, श्रेयो मूलमपि ह्ययम् ।।"
श्लोकोऽयं कस्मिन् ग्रन्थे उपलभ्यते ?

(1) विश्वेश्वरस्मृतिग्रन्थे ।

(2) याज्ञवल्क्यस्मृतिग्रन्थे ।

(3) मनुस्मृतिग्रन्थे ।

(4) कौटिल्यार्थशास्त्रग्रन्थे ।

(5) अनुत्तरित प्रश्न

112. पञ्चदशवर्णीये लध्ववस्थायामेव केन कविना 'शिवपुष्पाञ्जलिः' नामकं स्तोत्रं रचितम् ?

(1) पंडित हरिद्विजेन

(2) पंडित रामप्रतापशास्त्रिणा

(3) पंडित नित्यानन्दशास्त्रिणा

(4) पंडित विद्याधरशास्त्रिणा

(5) अनुत्तरित प्रश्न

113. 'काव्यमाला' इति शृंङ्खलायां ग्रन्थ सम्पादनम् अपि कृतवान् –

(1) पं. दुर्गाप्रसाद द्विवेदी

(2) पं. मधुसूदन ओझा

(3) ब्रह्मानन्द शर्मा

(4) पं. नवलकिशोर काङ्करः

(5) अनुत्तरित प्रश्न

114. आधुनिकसंस्कृतकविः पंडित जगदीशचन्द्राचार्यस्य कृति अस्ति –

(1) शिवराजविजयः (2) कलिदैन्यम्

(3) वासुदेव-चरितम् (4) हनुमद्दूतम्

(5) अनुत्तरित प्रश्न

115. अत्र संस्कृतकवीनां नामानि लिखितानि –

(क) गिरिधरशर्मा चतुर्वेदी

(ख) पं. विद्याधरशास्त्री

(ग) ब्रह्मानन्द शर्मा

(घ) गिरिधरशर्मा नवरत्न

कोऽपि जनः राजस्थाने दक्षिणतः उत्तरं प्रति गच्छति तदा पूर्वापर क्रमेण कवीनां जन्मस्थानस्य क्रमः भवति –

(1) (घ), (क), (ख), (ग)

(2) (क), (ख), (ग), (घ)

(3) (घ), (ख), (ग), (क)

(4) (ग), (घ), (क), (ख)

(5) अनुत्तरित प्रश्न

116. "तत्वशतकम्" इति काव्यस्य रचनाकारः अस्ति –

(1) प्रभाकर शास्त्री

(2) भट्ट मथुरानाथ शास्त्री

(3) पं. विश्वेश्वरनाथ रेऊ

(4) ब्रह्मानन्द शर्मा

(5) अनुत्तरित प्रश्न

117. पं. गिरिधरशर्मा नवरत्नः कस्य राज्यस्य राजगुरुः आसीत् ?

(1) झालावाड राज्यस्य

(2) कोटा राज्यस्य

(3) बूंदी राज्यस्य

(4) मेवाड़ राज्यस्य

(5) अनुत्तरित प्रश्न

[redacted]

118. 'संस्कृतरत्नाकरः', 'भारती' च इति पत्रिकाद्वयस्य अपि सम्पादनं कृतवान् –

(1) पं. गणेशराम शर्मा
(2) भट्ट मथुरानाथ शास्त्री
(3) पं. रामप्रताप शास्त्री
(4) ब्रह्मानन्द शर्मा
(5) अनुत्तरित प्रश्न

119. हरिद्वारलाहौरजयपुरादिषु स्थानेषु कार्यं कृत्वा यः अन्ते काशिराजस्य आज्ञया पुराणानां संकलनं सम्पादनं च आरब्धवान्, सः अस्ति –

(1) पं. मधुसूदन ओझा
(2) पं. दुर्गाप्रसाद द्विवेदी
(3) पं. गिरिधरशर्मा चतुर्वेदी
(4) पं. हरिशास्त्री दाधीचः
(5) अनुत्तरित प्रश्न

120. 'जैमिनीयपद्यामृतम्' इति कस्य रचनास्ति ?

(1) पंडित जगदीशचन्द्राचार्यस्य
(2) पंडितगिरिधरशर्मानवरत्नस्य
(3) पंडितदुर्गाप्रसादद्विवेदिनः
(4) पंडितनित्यानंदशास्त्रिणः
(5) अनुत्तरित प्रश्न

121. गिरिधरशर्मानवरत्नस्य रचनाऽस्ति –

(1) आत्मदर्शनम् । (2) हरनामामृतम् ।
(3) लीला लहरी । (4) प्रेमपयोधिः ।
(5) अनुत्तरित प्रश्न

122. कवेः नाम तस्य जन्मनः वर्षं च प्रदत्तम्, अत्र अनुचित युग्मम् अस्ति –

(1) पं. मधुसूदन ओझा – 1924 (वि.सं.)
(2) पं. गिरिधरशर्मा चतुर्वेदी – 1881 (ई.)
(3) भट्ट मथुरानाथ शास्त्री – 1889 (ई.)
(4) पं. विद्याधर शास्त्री – 1893 (ई.)
(5) अनुत्तरित प्रश्न

123. भरतदृशा वीररसोऽस्ति –

(1) रक्तवर्णः (2) श्यामवर्णः
(3) नीलवर्णः (4) गौरवर्णः
(5) अनुत्तरित प्रश्न

124. पंचमनाट्यवेदनिर्माणार्थं ब्रह्मा ऋग्वेदात् किं जग्राह ?

(1) पाठ्यम् (2) गीतम्
(3) अभिनयम् (4) रसान्
(5) अनुत्तरित प्रश्न

125. नाट्यशास्त्रे लघुतमं प्रमाणम् उक्तम् –

(1) अणुः (2) अंगुलम्
(3) हस्तः (4) दण्डः
(5) अनुत्तरित प्रश्न

126. नाट्यमण्डपनिर्माणे क्रमिक रूपेण भवति –

(1) भित्तिकर्म, भित्तिलेपः, परिमार्जनम्, चित्रकर्म
(2) भित्तिकर्म, परिमार्जनम्, भित्तिलेपः, चित्रकर्म
(3) परिमार्जनम्, भित्तिलेपः, भित्तिकर्म, चित्रकर्म
(4) भित्तिलेपः, परिमार्जनम्, चित्रकर्म, भित्तिकर्म
(5) अनुत्तरित प्रश्न

127. "विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः ।।" इति कारिकांशः नाट्यशास्त्रस्य कस्मात् अध्यायात् उद्धृतोऽस्ति ?

(1) द्वितीयाध्यायात् (2) प्रथमाध्यायात्
(3) तृतीयाध्यायात् (4) एकादशाध्यायात्
(5) अनुत्तरित प्रश्न

128. अनुचित युग्मम् अस्ति -
(1) रसः – अद्‌भुतः
(2) स्थायिभावः – विस्मयः
(3) व्यभिचारिभावः – असूया
(4) सात्त्विकभावः – औत्सुक्यम्
(5) अनुत्तरित प्रश्न

129. 'अष्टौ नाट्ये रसाः स्मृताः' इति कस्य मतं वर्तते ?
(1) आनन्दवर्धनस्य (2) मम्मटस्य
(3) भरतमुनेः (4) जगन्नाथस्य
(5) अनुत्तरित प्रश्न

130. वीर रसात् एव उत्पत्तिः भवति -
(1) बीभत्स रसस्य (2) भयानक रसस्य
(3) अद्‌भुत रसस्य (4) रौद्र रसस्य
(5) अनुत्तरित प्रश्न

131. पताका प्रकरी च भेदौ स्तः -
(1) 'आधिकारी' इतिवृत्तस्य
(2) नाट्यस्य
(3) नायकस्य
(4) 'प्रासङ्गिक' इतिवृत्तस्य
(5) अनुत्तरित प्रश्न

132. दशरूपकानुसारेण 'नृत्तम्' इत्यस्य लक्षणम् अस्ति
(1) रसाश्रयम् (2) भावाश्रयम्
(3) ताललयाश्रयम् (4) गुणाश्रयम्
(5) अनुत्तरित प्रश्न

133. भरतदृशा रौद्ररसो भवति -
(1) उत्साहात्मकः
(2) भयस्थायिभावात्मकः
(3) उग्रकर्मक्रियात्मकः
(4) शोकस्थायिप्रभवः
(5) अनुत्तरित प्रश्न

134. दशरूपकग्रन्थे 'समाधानम्' इत्यनेनाशयो भवति
(1) गुणाख्यानम् (2) सुखागमः
(3) बीजागमः (4) बीजन्यासः
(5) अनुत्तरित प्रश्न

135. 'समुद्रमन्थनम्' कस्य रूपकस्य उदाहरणं वर्तते ?
(1) डिमस्य (2) ईहामृगस्य
(3) समवकारस्य (4) अंकस्य
(5) अनुत्तरित प्रश्न

136. धूर्त चरितस्य वर्णनं भवति
(1) समवकारे (2) व्यायोगे
(3) नाटिकायां (4) भाणे
(5) अनुत्तरित प्रश्न

137. संस्कृतप्रायो वाग्व्यापारो नटाश्रयः का वृत्तिः भवति ?
(1) आरभटी (2) भारती
(3) कैशिकी (4) सात्त्वती
(5) अनुत्तरित प्रश्न

138. आधिकारिकं प्रासङ्गिकं च कस्य भेदौस्तः ?
(1) कथावस्तु नः (2) नायकस्य
(3) रसस्य (4) वाक्यस्य
(5) अनुत्तरित प्रश्न

139. 'अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्' इति लक्षणं वर्तते -
(1) नाटकस्य (2) भाणस्य
(3) प्रकरणस्य (4) व्यायोगस्य
(5) अनुत्तरित प्रश्न

140. दशरूपके अङ्कास्यम् अस्ति -
(1) एकं संध्यंगम्
(2) एकः अर्थोपक्षेपकः
(3) एकः इतिवृत्तभेदः
(4) एकः नाट्यभेदः
(5) अनुत्तरित प्रश्न

141. "मुख्यार्थबाधे तद्योगे....... अत्र 'तद्योगे' इति पदस्य अर्थः अस्ति

(1) अन्यार्थेन योगे (2) लक्ष्यार्थेन योगे
(3) व्यङ्ग्यार्थेन योगे (4) मुख्यार्थेन योगे
(5) अनुत्तरित प्रश्न

142. अत्र वाक्यद्वयम् अस्ति –

(क) रत्यादेः स्थायिनः कार्याणि अनुभावाः ।
(ख) स्थायी भावो रसः स्मृतः ।

एतयोः वाक्ययोः सत्यम् अस्ति –

(1) केवलं (क) वाक्यं सत्यम् ।
(2) केवलं (ख) वाक्यं सत्यम् ।
(3) (क), (ख) इति वाक्यद्वयम् अपि सत्यम् ।
(4) (क), (ख) इति वाक्यद्वयम् अपि असत्यम् ।
(5) अनुत्तरित प्रश्न

143. 'आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्' एतत् कस्य उदाहरणम् अस्ति ?

(1) शिवेतरक्षतये (2) व्यवहारविदे
(3) सद्यः परनिर्वृतये (4) अर्थकृते
(5) अनुत्तरित प्रश्न

144. अधोलिखितेषु अनुचितयुग्म् अस्ति :

(1) भट्टनायकः – रसनिष्पत्तिवादः
(2) शङ्कुकः – रसानुमितिवादः
(3) भट्टलोल्लटः – रसोत्पत्तिवादः
(4) अभिनवगुप्तः – रसाभिव्यक्तिवादः
(5) अनुत्तरित प्रश्न

145. अधोलिखितेषु अनुचित युग्मं अस्ति :

(1) निपुणता – काव्य हेतुः
(2) शब्दार्थौ – काव्य स्वरूपम्
(3) ध्वनिः – मध्यमकाव्यम्
(4) सद्यः परनिर्वृतिः – काव्यप्रयोजनम्
(5) अनुत्तरित प्रश्न

146. "साधर्म्यमुपमा भेदे" – अत्र साधर्म्यं भवति –

(1) उपमान साधारणधर्मयोः ।
(2) उपमेय साधारणधर्मयोः ।
(3) उपमानोपमेययोः ।
(4) उपमानोपमा प्रतिपादक शब्दयोः ।
(5) अनुत्तरित प्रश्न

147. साक्षात् संकेतितस्य अर्थस्य बोधिका शब्दशक्तिः का ?

(1) उपादान – लक्षणा
(2) लक्षण – लक्षणा
(3) व्यञ्जना
(4) अभिधा
(5) अनुत्तरित प्रश्न

148. 'तात्पर्यार्थोऽपि केषुचित्' अत्र 'केषुचित्' पदस्य बोधकाः सन्ति –

(1) वैयाकरणिकाः (2) नैयायिकाः
(3) मीमांसकाः (4) वैदिकाः
(5) अनुत्तरित प्रश्न

149. "सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्" अत्र 'समेन' इत्यस्य अर्थः अस्ति –

(1) उपमानेन (2) उपमेयेन
(3) वाचकशब्देन (4) साधारणधर्मेण
(5) अनुत्तरित प्रश्न

150. 'अकाण्डे प्रथनम्' इति रसदोषस्य उदाहरणम् अस्ति –

(1) 'हयग्रीववधे' हयग्रीवस्य वर्णनम् ।
(2) 'कर्पूरमञ्जर्यां' बन्दिवर्णितस्य वसन्तवर्णनस्य राज्ञा प्रशंसनम् ।
(3) 'वेणी संहारे' द्वितीये अङ्के भानुमत्या सह दुर्योधनस्य शृङ्गार वर्णनम् ।
(4) 'कुमार सम्भवे' रति विलापः ।
(5) अनुत्तरित प्रश्न

रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK